# MathamnAyopanishad

# मठाम्नायोपनिषत्

## Document Information

Text title : maThAmnAyopaniShat

File name : maThAmnAyopaniShat.itx

Category : upanishhat, vedanta, shankarAchArya

Location : doc_upanishhat

Author : shankarAchArya

Proofread by : Sunder Hattangadi

Description-comments : Unpublished Upanishads edited by C.Kumham Raja, 1933

Latest update : October 18, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# मठाम्नायोपनिषत्

ॐ ऊर्ध्वाम्नायगुरूपदेशभुवनाकारसिंहासनसिद्धाचारवन्दित
समस्तवेदवेदान्तसारनिर्माण परात्पर
निरञ्जनज्ञानार्थषट्चक्रजाग्रतीमय परावाचा
परात्पर सर्वसाक्षिधृत चिन्मय ज्योतिर्लिङ्ग निराकार
गळित पूर्णप्रभाशोभितं शान्त चन्द्रोदयनिभ भज
मनस्तच्छ्रीगुरुचैतन्य प्रणमामि ॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥

ॐ प्रथमे पश्चिमाम्नाय शारदामठ कीटवारिसम्प्रदाय
तीर्थाश्रमपद द्वारकाक्षेत्र सिद्धेश्वरो देव भद्रकाळी
देवी ब्रह्मस्वरूपाचार्य गङ्गागोमतीतीर्थ स्वरूपब्रह्मचारी
सामवेदप्रपठन “तत्त्वमसि” इत्यादिवाक्यविचार
नित्यानित्यविवेकेनात्मनोपास्ति आत्मतीर्थे आत्मोद्धारार्थे साक्षात्कारार्थे
सन्न्यासग्रहणं करिष्ये । ॐ नमो नारायणायेति ॥

ॐ द्वितीये पूर्वाम्नाय गोवर्धनमठ भोगवारिसम्प्रदाय वनारण्ये
पुरुषोत्तम क्षेत्र जगन्नाथ विमला देवी भद्रपद्मपादाचार्य
महोदधितीर्थ प्रकाशब्रह्मचारी ऋग्वेदप्रपठन तमेवैक्य
जानथ “प्रज्ञानमानन्द ब्रह्म” इत्यादिवाक्यविचार
नित्यानित्यविवेकेनात्मनोपास्तिं आत्मतीर्थे आत्मोद्धारार्थे साक्षात्कारार्थे
सन्न्यासग्रहण करिष्ये । ॐ नमो नारायणायेति ॥

ॐ तृतीये उत्तराम्नाय ज्योतिर्मठ आनन्दवारिसम्प्रदाय
गिरिपर्वतसागरपदानि बदरिकाश्रमक्षेत्र नारायणो देवता
पूर्णगिरी देवी त्रोटकाचार्य अलकनन्दातीर्थं आनन्दब्रह्मचारी
अथर्वणवेदपठन तमेवैक्य जानथ “अयमारमा ब्रह्म”

इत्यादिवावाक्यविचार नित्यानित्यविवेकेनात्मनोपास्तिं आत्मतीर्थे आत्मोद्धारार्थे साक्षात्कारार्थे सन्न्यासग्रहणं करिष्ये । ॐ नमो नारायणायेति ॥

ॐ चतुर्थे दक्षिणाम्नाय शृङ्गेरीमठ भूरिवारिसम्प्रदाय सरस्वतीभारतीपुरी चेतिपदानि रामेश्वरक्षेत्र आदिवराहो देवता कामाक्षी देवी शृङ्गी ऋषि पृथ्वीधराचार्य तुङ्गभद्रातीर्थं चैतन्यब्रह्मचारी यजुर्वेदप्रपठन तमेवैक्य जानथ "अहं ब्रह्मास्मि" इत्यादिवाक्यविचार नित्यानित्यविवेकेनात्मनोपास्तिं आत्मतीर्थे आत्मोद्धारार्थे साक्षात्कारार्थे सन्न्यासग्रहणं करिष्ये । ॐ नमो नारायणायेति ॥

ॐ पञ्चमे ऊर्ध्वाम्नाय सुमेरुमठ काशीसम्प्रदाय जनकयाज्ञवल्क्यादिशुकवामदेवादिजीवन्मुक्ता एतत्सनकसनन्दनकपिलनारदादिब्रह्मनिष्ठा नित्यब्रह्मचारी कैलासक्षेत्र मानससरोवर तीर्थ निरञ्जनो देवता माया देवी ईश्वराचार्य अनन्तब्रह्मचारी शुकदेववामदेवादिजीवन्मुक्तानां सुसवेदप्रपठनं परोरजसेसावदों "सज्ञानमनन्तं ब्रह्म" इत्यादिवाक्यविचार नित्यानित्यविवेकेनात्मनोपास्तिं आत्मतीर्थे आत्मोद्धारार्थे साक्षात्कारार्थे सन्न्यासग्रहणं करिष्ये । ॐ नमो नारायणायेति ॥

ॐ षष्ठे आत्माम्नाय परमात्मा मठ सत्यसुसम्प्रदाय नाभिकुण्डलिक्षेत्र त्रिकुटी तीर्थं हंसो देवी परमहूंअसो देवता अजपासोहंमहामन्त्र ब्रह्मविष्णुमहेश्वराद्या जीवब्रह्मचारी हंसविद् उपास्ति उपाधिभेदसन्न्यासार्थं ज्ञानसन्न्यासग्रहणं करिष्ये । ॐ नमो नारायणायेति ॥

ॐ सप्तमे जम्बूद्वीप सम्यग्ज्ञान शिखा न सूत्र वेद्यवेदक श्रद्धा नदी विमलातीर्थं आत्मलिङ्गशान्त्यर्थे विचार नित्यानित्यविवेकेन आत्मनोपास्तिं आत्मतीर्थे आत्मोद्धारार्थे साक्षात्कारार्थे सन्यासग्रहणं करिष्ये । ॐ नमो नारायणायेति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचिता मठाम्नायोपनिषत् समाप्ता ।

Proofread by Sunder Hattangadi

*MathamnAyopanishad*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*